३ ७७

नं० ११६०-घ

**कतिच्चिद्वेदमंत्राः** (ऋग्वेद संहितायां अप्रकाशित)

पत्राणि ३ (त्रीणि)

नं० ११६०-घ

RV 1,27,13

॥श्रीगणेशाय नमः॥ नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो न

मआशिनेभ्यः॥ यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि

RV 1,122,3

देवाः॥१॥ ममन्नु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वां॥

शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः॥२॥ क

था ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः॥ उभे

यत्तोके तनये दधाना ऋतस्य सामं जनयन्त देवाः॥३॥ यज्ञेन य

ज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्॥ ते ह नाकं महि

मानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥४॥ पराशुभा अयासो

यव्या साधारण्येव मरुतो मिमिक्षुः॥ न रोदसी अप नुदन्त घोरा

जुषन्त वृधं सख्याय देवाः॥५॥ त्वे रायः ईंद्र तोशतमाः प्रणेता

ः कस्य चिद्दनायोः॥ते षु णो मरुतो मृळयंतु ये स्मा पुरा गा तु यंतीव देवाः॥६॥
ॐ॰ उ भा शंसा नर्या मामविष्टा मुभे मा मूतीअवसा सचेतां॥ भूरिचिद्र्यः
स्तुवतो रायेषामदंत इषयेम देवाः॥७॥ उतनन ईं मरुतो वृद्ध सेनास्मे
द्रोदसीसमनसः सदंतु॥ पृषदश्वासोवनयो नरथारिशादसो मि
त्रयुजो न देवाः॥८॥ तव स्याम पुरुवीरस्य धर्मन्नुरुशंसस्य वरुण
प्रणेतः॥ यूयं नः पुत्रा अदितेरदब्धा अभिक्षमध्वं युज्याय देवाः॥९॥
दिवश्चिद्धा तेरुचयंत रोका उषो विभातीरनु भासिपूर्वीः॥ अ
पो यदग्न उशधग्वने षु होतुर्मंद्रस्य पनयंत देवाः॥१०॥ शं स्ता
महामिंद्र यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन्॥
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयंत देवाः॥११॥

२यं

त्रिरुत्तमा दूणाशा रोचनानि त्रयोजं त्यसुरस्य वीराः ॥ ऋनावान इषिरा दू
ळभासस्त्रिरा द्दिवो विदथे संतु देवाः ॥१२॥ नापाभूत न वोतीतृषामा निः
शस्ता ऋभवो यज्ञे अस्मिन् ॥ समिंद्रेण मदथ सं मरुद्भिः सं राजभी रत्न
धेयाय देवाः ॥१३॥ अप्रतीतो जयति सं धनानि प्रति जन्यान्युत या
सजन्या ॥ अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवंति देवाः ॥१४॥
को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः ॥
सहीयसो वरुण मित्र मर्तात् को वोध्वरे वरिवो धाति देवाः ॥१५॥
त्वमपो यद्वे तुर्वशायारमः सदुघाः पार इंद्र ॥ उग्रमयातमवहो ह
कुत्सं सं ह यद्वामुशनारंत देवाः ॥१६॥ मूर्धानं दिवो अरतिं पृथिव्या
वैश्वानरमृत आ जातमग्निं ॥ कविं संम्राजमतिथिं जनानामास

श्रो पात्वंजन पंतदेवाः॥१७॥ नाभीयं ह्वानां सदनं रयीणां महामाहवम
भि सं नवंत॥ वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंतदेवाः॥१८॥
ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः॥ दशस्यं
तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः॥१९॥
ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे॥
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यंतु देवाः॥२०॥
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः॥ यः
शंसते स्तुवते धायि पज्र इंद्रज्येष्ठा अस्माँ अवंतु देवाः॥२१॥
परिषधन्वेंद्राय सोम स्वादुर्मित्राय पूष्णे भगाय॥ इंद्रस्ते सोम

स्कः तस्य पेयाः इक्षे सेदक्षाय विश्वेच रदेवाः॥२२॥ प्रयाजान्मे अनुयाजां
श्चके वलानूर्जस्यं तं हविषो दत्त भागं॥ घृतं चापां पुरुषं चौषधीनामग्ने
श्च दीर्घमायुरस्तु देवाः॥२३॥ ऐभिर्द्दवृष्ण्यापौंस्यानियेभिरौ
क्ष वृत्र हत्याय वज्री॥ ये कर्मणः क्रियमाणस्य मन्ह ऋते कर्ममु
द्जायंत देवाः॥२४॥ अनृक्षरा ऋजवः संतु पंथा येभिः सखायो
यंति नो वरेयं॥ समर्यमा संभगो नो निनी याः संजास्पत्यं सुयममस्तु देवाः॥२५॥ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरद
ष्टिर्यथासः॥ भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्या
य देवाः॥२६॥ समस्मिंजायमान आसत ग्ना उतेमवर्धन्न द्य
य हर्ताः॥ महे यत्त्वा पुरूरवो रणाया वर्धयन्दस्युहत्याय देवाः॥२७॥

धं स्मन्या रिच्य रन्ति वे। विसद्विषः सदेवानां भवस्येकमं गं ।। त्रेन
3 जायामन्य। विंदस्व ह स्पतिः सोमेन नीतां जुह्वा२ न देवाः ॥२८
३ सद्योजातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ॥ अस्य होतुः
प्रतिश्यत स्य वाचि स्वाहाकृतं हविरदंतु देवाः ॥२९॥ इदंते पा
त्रं सनवित्तमिंद्र पिबा सोममेना शतक्रतो ॥ पूर्ण ऽआहावो मदिर RV. 10, 112, 6
स्य मध्वो यं विश्व इदभिहर्यंति देवाः ॥३०॥ गणानां ॥ इति द्वे स
माप्तः ॥ ॥ ॥ श्री महाकालीर्णमस्तु ॥ शुभं भवतु ॥